# मूलरामायणम्



बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः ।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ।। 1.1.7 ।।

पदच्छेदः – बहवः दुर्लभाः च एव ये त्वया कीर्तिताः गुणाः मुने वक्ष्यामि अहम् बुद्ध्वा तैः युक्तः श्रूयताम् नरः

| पदपरिचयः – | पदपरिचयः – |
| --- | --- |
| बहवः = अनेके | अहं बुद्ध्वा वक्ष्यामि = अहं (नारदः) ज्ञात्वा कथयिष्यामि |
| दुर्लभाः = लब्धुम् आशक्याः | तैः युक्तः = पूर्वोक्तैः गुणैः समन्वितः |
| ये त्वया कीर्तिताः गुणाः = वाल्मीकिना कथिताः गुणाः | नरः = मनुष्यः |
| मुने = हे महर्षे | श्रूयताम् = आकर्णयतु |

बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः ।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ।। 1.1.7 ।।

दुर्लभाः = दुःखेन लभ्याः (दुर् + लभ्+ खर्)
दुस् + कृ + खल् = दुष्करः
सु + कृ + खल् = सुकरः
सु + लभ् + खल् = सुलभः

कृत् – संशब्दने + क्त = कीर्तित

वक्ष्यामि = वच् (परिभाषणे) लृट्-प्र-ए

श्रूयताम् = श्रु (श्रवणे) कर्मणि लोट्

यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः – अमरः

बहु – बहि (वृद्धौ)

प्रभूतं प्रचुरं प्राज्यम्, अदभ्रं बहुलं बहु_पुरुहं, पुरु, भूयिष्ठं,
स्फिरं, भूयश च भूरि च ॥ - अमरः

अन्वयः
मुने! त्वया ये बहवः दुर्लभाः गुणाः कीर्तिताः तैः युक्तः नरः श्रूयताम् । अहं बुद्ध्वा वक्ष्यामि ।

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ।। 1.1.8 ।।

पदच्छेदः – इक्ष्वाकुवंशप्रभवः रामः नाम जनैः श्रुतः
नियतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी

पदपरिचयः –
इक्ष्वाकुवंशप्रभवः = इक्ष्वाकु-कुले उत्पन्नः
रामो नाम जनैः श्रुतः = “रामः” इति नाम्ना प्रसिद्धः
नियतात्मा = निगृहीत-अन्तःकरणः
महावीर्यः = बलशाली

पदपरिचयः –
द्युतिमान् = कान्तिमान्
धृतिमान् = धैर्यशाली
वशी = जितेन्द्रियः

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ।। 1.1.8 ।।

इक्ष्वाकोः वंशः = इक्ष्वाकुवंशः
इक्ष्वाकुवंशः प्रभवः (उत्पत्ति-स्थानम्) यस्य सः = इक्ष्वाकुवंशप्रभवः
नियतः आत्मा यस्य सः = नियतात्मा
महत् वीर्यं यस्य सः = महावीर्यः
द्युतिः अस्य अस्तीति द्युतिमान्
धृतिः अस्य अस्तीति धृतिमान्
वशः अस्य अस्तीति वशी (इनि)

प्र + भू + अ = प्रभवः (प्रभवति अस्माद् इति प्रभवः)
श्रु + क्त = श्रुत
नि + यम् + क्त = नियत
इक्षुम् आकरोतीति इक्ष्वाकुः
स्याज्जन्महेतुः प्रभवः – अमरः
धृतिर्धारणा धैर्ययोः - अमरः

अन्वयः
इक्ष्वाकुवंशप्रभवः नियतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी रामो नाम जनैः श्रुतः (अस्ति)

बुद्धिमान्नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ।। 1.1.9 ।।

पदच्छेदः – बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रु-निबर्हणः
विपुलांसः महाबाहुः कम्बुग्रीवः महाहनुः

पदपरिचयः –
बुद्धिमान् – मतिमान्
नीतिमान् - नीतिज्ञः
वाग्मी – वाक्पटुः
श्रीमान् – ऐश्वर्यसम्पन्नः
शत्रुनिबर्हणः = शत्रु-नाशकः
विपुलांसः = उन्नत-कन्धरः (neck)

पदपरिचयः –
महाबाहुः = दीर्घबाहुः
कम्बुग्रीवः = शङ्ख-तुल्य-कण्ठः
महाहनुः = पुष्ट-कपोल-अधोभागः (jaw)

बुद्धिमान्नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ।। 1.1.9 ।।

बुद्धिः अस्य अस्तीति बुद्धिमान्

नीतिः अस्य अस्तीति नीतिमान्

प्रशस्ता (अतिश्रेष्ठा) वाग् अस्य इति वाग्मी

"वाचो ग्मिनिः" मतुबर्थे ग्मिनि प्रत्ययः भवति।

श्रीः अस्य अस्ति इति श्रीमान्

नितरां बर्हति इति निबर्हणः (नि+बर्ह (मारणे))

शत्रूणां निबर्हणः शत्रुनिबर्हणः (ष.तत्)

विपुलौ अंसौ (स्कन्धौ) यस्य सः विपुलांसः

महान्तौ बाहू (भुजौ) यस्य सः महाबाहुः

कम्बुः इव ग्रीवा यस्य सः कम्बुग्रीवः

महती हनुः यस्य सः महाहनुः

बुद्धिमान्नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ।। 1.1.9 ।।

वाचः युक्तिः पटुः वाग्मी – अमरः

शोभा-सम्पत्तिः-पद्मासु लक्ष्मीः श्रीरपि गद्यते - मेदिनीकोषः

अधस्ताच्चिबुकं गण्डकपोलौ, तत्परा हनुः – अमरः

कम्बुग्रीवा त्रिरेखा सा – अमरः

रेखात्रयान्विता ग्रीवा कम्बुग्रीवेति कथ्यते (हलायुधकोषः)

अन्वयः

बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः विपुलांसः महाबाहुः कम्बुग्रीवः महाहनुः (च अस्ति)

महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ।। 1.1.10 ।।

पदच्छेदः – महोरस्कः महेष्वासः गूढ-जत्रुः अरिन्दमः
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः

पदपरिचयः –
महोरस्कः = विशाल-वक्षःस्थलवान्
महेष्वासः = महाधनुर्धरः
गूढजत्रुः = यस्य जत्रुणी (collar bones) अप्रकाशिते
अरिन्दमः = शत्रु-विजयी
आजानुबाहुः = यस्य जानु-पर्यन्तं दीर्घभुजौ स्तः

पदपरिचयः –
सुशिराः = शोभन-शिरस्कः
सुललाटः = सुभालः
सुविक्रमः = यस्य गतिः शोभना अस्ति

महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ।। 1.1.10 ।।

महद् उरः यस्य सः महोरस्कः (कप्-प्रत्यय)

इषवः (बाणाः) अस्यन्ते इति इष्वासः

महान् इष्वासः यस्य सः महेष्वासः

गूढे जत्रुणी यस्य सः गूढजत्रुः

अरीन् दमयतीति अरीन्दमः (उपपदसमासः)

आजानुभ्याम् इति आजानु (अव्ययीभावः)

आजानु बाहू यस्य सः आजानुबाहुः

शोभनं शिरः यस्य सः सुशिराः

शोभनः ललाटः यस्य सः सुललाटः

शोभनः विक्रमः यस्य सः सुविक्रमः

विशेषेन क्रामति इति विक्रमः – क्रमु (पादविक्षेपे)

जन्- जायते बाहः अस्मात् इति जत्रु

जन् – जायते (पादः) इति जानु

लल्+अट् (ललति=इच्छति) ललम् अटति ज्ञापयति

इति ललाटः

महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ।। 1.1.10 ।।

ललाटम् अलिकम्,गोधि – अमरः
धनुः,चापः,धन्वन्,शरासनम्,कोदण्डः,कार्मुकम्,इष्वासः – अमरः
उरः वत्सं वक्षः – अमरः
जत्रु, सन्धी (स्त्री) - अमरः
शिरः उत्तमाङ्गम् शीर्षम् - अमरः
जानु ऊरुपर्वन् अष्ठीवत् -अमरः

अन्वयः
(तथा सः) महोरस्कः महेष्वासः गूढजत्रुः अरिन्दमः आजानुबाहुः सुशिराः सुललाटः सुविक्रमः (च अस्ति)

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः ।। 1.1.11 ।।

पदच्छेदः – समः सम-विभक्ताङ्गः स्निग्धवर्णः प्रतापवान् पीनवक्षाः विशालाक्षः लक्ष्मीवान् शुभलक्षणः

पदपरिचयः –
समः = समानः
सम-विभक्ताङ्गः = यस्य शोभनतया अवयवाः घटिताः
स्निग्धवर्णः = श्यामलवर्णवान्
प्रतापवान् = विक्रमी

पदपरिचयः –
पीनवक्षाः = यस्य विशालं वक्षःस्थलम्
विशालाक्षः = विशालनेत्रः
लक्ष्मीवान् = सौन्दर्यवान्
शुभलक्षणः = सामुद्रिक-शास्त्रविहित-सर्वलक्षण-सम्पन्नः

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः ।। 1.1.11 ।।

समानि विभक्तानि अङ्गानि यस्य सः समविभक्ताङ्गः

स्निग्धः वर्णः यस्य सः स्निग्धवर्णः

प्रतापः अस्य अस्ति इति प्रतापवान्

पीनं वक्षः यस्य सः पीनवक्षः

विशाले अक्षिणी यस्य सः विशालाक्षः

लक्ष्मीः अस्य अस्ति इति लक्ष्मीवान्

शुभानि लक्षणानि यस्य सः शुभलक्षणः

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः ।। 1.1.11 ।।

स्निह् (स्नेहे) + क्तः = स्निग्ध

चिक्कण,मसृण,स्निग्ध – अमरः (स्निग्धः इति मित्रस्यापि पर्यायः)

पीन,पीवन्,स्थूल,पीवर,दृढ – अमरः

लक्ष्-(दर्शन-अङ्कनयोः) ई+मुट् = लक्ष्मीः

(लक्ष्+मतुबर्थीयः नकारप्रत्ययः+णत्वप्राप्तिः =लक्ष्मणः)

अन्वयः
(तथा सः) समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् पीनवक्षा विशालाक्षः लक्ष्मीवान् शुभलक्षणः (च अस्ति)